# श्रीमद् भागवत रसिक कुटुंब

## श्री दामोदर अष्टकम्

नमामीश्वरं सच्-चिद्-आनन्द-रूपं(लँ),
लसत्-कुण्डलं(ङ्) गोकुले भ्राजमनम्।
यशोदा-भियोलूखलाद् धावमानं,
परामृष्टम् अत्यन्ततो द्रुत्य गोप्या ॥ 1॥

रुदन्तं मुहुर् नेत्र-युग्मं मृजन्तम्,
कराम्भोज-युग्मेन सातङ्क-नेत्रम्।
मुहुः(श्) श्वास-कम्प-त्रिरेखाङ्क-कण्ठ-
स्थित-ग्रैवं(न्) दामोदरं भक्ति-बद्धम् ॥ 2॥

इतीदृक् स्व-लीलाभिर् आनन्द-कुण्डे
स्व-घोषं(न्) निमज्जन्तम् आख्यापयन्तम्।
तदीयेषित-ज्ञेषु भक्तैर् जितत्वं,
पुनः(फ्) प्रेमतस् तं शतावृत्ति वन्दे ॥ 3॥

वरं(न्) देव मोक्षं(न्) न मोक्षावधिं(वँ) वा,
न चन्यं(वँ) वृणेऽहं(वँ) वरेषाद् अपीह।

इदं(न्) ते वपुर् नाथ गोपाल-बालं,
सदा मे मनस्य् आविरास्तां(ङ्) किम् अन्यैः ॥ 4॥

इदं(न्) ते मुखाम्भोजम् अत्यन्त-नीलैर्,
वृतं(ङ्) कुन्तलैः(स्) स्निग्ध-रक्तैश् च गोप्या।
मुहुश् चुम्बितं बिम्ब-रक्ताधरं मे,
मनस्य् आविरास्ताम् अलं(ल्ँ) लक्ष-लाभैः ॥ 5॥

नमो देव दामोदरानन्त विष्णो,
प्रसीद प्रभो दुःख-जालाब्धि-मग्नम्।
कृपा-दृष्टि-वृष्ट्याति-दीनं बतानु,
गृहाणेष माम् अज्ञम् एध्य् अक्षि-दृश्यः ॥ 6॥

कुबेरात्मजौ बद्ध-मूर्त्यैव यद्वत्,
त्वया मोचितौ भक्ति-भाजौ कृतौ च।
तथा प्रेम-भक्तिं स्वकां मे प्रयच्छ,
न मोक्षे ग्रहो मेऽस्ति दामोदरेह ॥ 7॥

नमस् तेऽस्तु दाम्ने स्फुरद्-दीप्ति-धाम्ने,
त्वदीयोदरायाथ विश्वस्य धाम्ने।
नमो राधिकायै त्वदीय-प्रियायै
नमोऽनन्त-लीलाय देवाय तुभ्यम् ॥ 8॥

॥ इति श्री दामोदर अष्टकम् सम्पूर्णं ॥